स्तुतिः। यथा, ऋग्वेदे। २। २४। १४।
"महीव रीतिः शवसासरत् पृथक्॥"
"महीव रीतिः महती स्तुतिरिव।" इति तद्भाष्ये सायणः॥) काव्यस्यात्मा। इति वामनसूत्रम्॥ गुणभेदेन तद्विभागमाह,
"ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः।
गौड़वैदर्भपाञ्चालरीतयः परिकीर्त्तिताः॥"
प्रत्येकमेषां लक्षणानि यथा,—
"ओजः समासभूयस्त्वं मांसलं पदडम्बरम्।
व्यक्तार्थपदमग्राम्यं प्रसादः परिकीर्त्तितः॥
शब्दार्थयोस्तु रसवन्मधुरं परिकीर्त्तितम्।
सर्व्वलोकावगम्यं यद्ग्राम्यं तदभिधीयते।
सुश्राव्यमपि गम्भीरं प्रसन्नमुपनागरम्॥"
ग्राम्यं यथा,—
"कन्ये मय्येष्यसि धन्यो यस्त्वामद्य विवाहयेत्।
नाल्पेन तपसा लभ्यः सुन्दरस्त्रीसमागमः॥"
उपनागरं यथा—
"तन्वि त्वदधरं स्वादु नाविदन्नविदो जनाः।
वसुधायां सुधाभावान्नृष्णया स्वर्गं ययासवः॥
शब्दालङ्करणं तत् स्याद्यदनुप्रासभास्वरम्।
वर्णावृत्तिरनुप्रासः पदे पादे विधीयते।
पदावृत्तिस्तु यमकमादिमध्यान्तसर्व्वगम्॥" ॥
क्रमेण रीतित्रयाणामुदाहरणानि।
"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्फणिस्फूर्ज्जत्फुत्कृतिभीतिसम्भृतिचमत्कारस्फुरत्सम्भ्रमा।
आनन्दान्तलवापिकां विदधती चित्ते गिरीशप्रभो-
स्त्वां पायान्नवसङ्गमे भगवती लज्जावती पार्व्वती॥
भवती विरहव्याधिमधिगम्य ससम्भ्रमा।
कामिनी यामिनीकान्तं कृतान्तमिव पश्यति॥
हन्तालि सन्तापनिवृत्तयेऽस्याः
किं तालवृन्तं तरलीकरोषि।
उत्ताप एषोऽन्तरतापहेतु-
र्गतप्रभुवो नयनतापनेयः॥"
इति काव्यचन्द्रिका॥
(अस्या अन्यद्विवरणं साहित्यदर्पणे ९ परिच्छेदे द्रष्टव्यम्॥)
रीतिकं, क्ली, पुष्पाञ्जनम्। इति राजनिर्घण्टः॥
रीतिका, स्त्री, कुसुमाञ्जनम्। इति शब्दचन्द्रिका
पित्तलञ्च॥ (यथा, वृहत्संहितायाम्। ५७।८।
"अष्टौ सीसकभागाः कांस्यस्य द्वौ तु रीतिकाभागः।
मयकथितो योगोऽयं विज्ञेयो वज्रसंघातः॥")
रीतिपुष्पं, क्ली, (रीतेः पित्तलस्य पुष्पमिव। तदाकृतित्वात्।) कुसुमाञ्जनम्। इत्यमरः। २। ९। १०३॥
रीव, ऋ ञ पीवे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ऋ, अरिरीवत्। ञ, रीवति रीवते। पीवो ग्रहणसंवरणयोः। इति दुर्गादासः॥

रु, ङ वधे। गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, रवते। इति दुर्गादासः॥
रु, ल ध्वनौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-अक०-सेट्।) ल, रौति रवीति पक्षी। इति दुर्गादासः॥
रुः, पुं, शब्दः। इत्येकाक्षरकोषः॥
रुकः, त्रि, बहुप्रदः। इति शब्दमाला॥
रुक्, [च्] स्त्री, (रुच्+भावे क्विप्।) शोभा। (यथा, माघे। ४। ६६।
"स्पर्द्धिरभितस्तटौ विकचवारिजाम्बूनदै-
र्विनोदितदिनक्लमाः कृतरुचश्च जाम्बूनदैः॥")
द्युतिः। (यथा, किराते। ५। ४५।
"क्षिपति योऽनुवनं विततां बृहद्-
बृहतिकामिव रौचनिकीं रुचम्॥")
इच्छा। इति मेदिनी॥ (यथा, महाभारते। १३। १२४। २८।
"नानाबुद्धिरुचो लोके मनुष्यान्नूनमिच्छसि।
ग्रहीतुं स्वगुणैः सर्व्वांस्तेनासि हरिणः कृशः॥"
तेजः। यथा, रघुः। ९। ६।
"अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा॥")
शारिकाशुकवाक्। इति शब्दरत्नावली॥
रुक्, [ज्] स्त्री, (रुज्+क्विप्।) रोगः। इत्यमरः।२।६।५१॥ (यथा, भागवते। ६।३।८।
"दोषस्य दृष्ट्वा गुरु लाघवं यथा
भिषक् चिकित्सेत रुजां निदानवित्॥"
रुजति पीड़यतीति। पीड़ादायके, त्रि। यथा, महाभारते। ५। ८४। १।
"प्रयान्तं देवकीपुत्त्रं परवीररुजो दश।
महारथा महाबाहुमन्वयुः शस्त्रपाणयः॥"
अथवा परस्य वीराणां रुक् येरिति॥)
रुक्प्रतिक्रिया, स्त्री, (रुजः प्रतिक्रिया निरसनम्।) चिकित्सा। इत्यमरः। २। ३। ५०॥
रुक्मं, क्ली, (रोचते शोभते इति। रुच्+"युजिरुचितिजां कुश्च। उणा० १। १४५। इति मक् कवर्गश्चान्तादेशः।) काञ्चनम्। (यथा, रामायणे। २। ७०। २१।
"रुक्मनिष्कसहस्रे द्वे षोड़शाश्वशतानि च।
सत्कृत्य केकयीपुत्त्रं केकेयो धनमादिशत्॥")
धुस्तूरम्। इत्यमरः॥ लौहम्। इति मेदिनी। मे, २८॥ (अस्य पर्य्यायो यथा,—
"कृष्णायसं काललोहं रुक्मं तत्तीक्ष्णमप्यथ॥"
इति वैद्यकरत्नमालायाम्॥)
नागकेशरम्। इति राजनिर्घण्टः॥ (वर्णे, पुं। इति उज्ज्वलदत्तः। १। १४५॥ दीप्तिशीले, त्रि। यथा, ऋग्वेदे। ५। ६१। १२।
"दिवि रुक्म इवोपरि॥"
"दिवि द्युलोके रुक्मो रोचमान आदित्य इव।"
इति तद्भाष्ये सायणः॥)
रुक्मकारकः, पुं, (रुक्मं स्वर्णालङ्कारं करोतीति। कृ+"कर्म्मण्यण्।" ३। २। १। इत्यण्। ततः स्वार्थे कन्।) स्वर्णकारः। इत्यमरः। २। १०। ८॥
रुक्माङ्गदः, पुं, राजविशेषः। यथा। अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नरपतिर्दिग्विजयव्यापारक्रमेणागत्य चन्द्रभागानदीतीरे समावेशितकटको वर्त्तते। इत्यादि हितोपदेशे १ परिच्छेदः॥
रुक्मिणी, स्त्री, (रुक्मो वर्णोऽस्त्यस्या इति। रुक्म+इनिः। ङीप्।) कृष्णमहिषीविशेषः। तत्पर्य्यायः। ईः २ रमा ३ सिन्धुजा ४ मामा ५ चला ६ हीरा ७ चपला ८ वृषाकपायी ९ चपला १० इन्दिरा ११ लक्ष्मीः १२ पद्मालया १३ पद्मा १४ कमला १५ श्रीः १६ हरिप्रिया १७। इति जटाधरः॥ अस्या विवरणं यथा,
"विदर्भराजो धर्म्मात्मा भीष्मको नाम धार्म्मिकः।
बभूवुस्तस्य पुत्त्रास्तु नाम्ना रुक्म्यादयः शुभाः॥
तेषामवरजा कन्या रुक्मिणी रुक्मवर्णिनी।
कमलांशेन सम्भूता सर्व्वलक्षणशोभिता॥
राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि।
साक्षाल्लक्ष्मीस्तु विज्ञेया प्राकट्येनैव पार्व्वति॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥॥
(रुक्मिण्या सह शिशुपालस्य विवाहघोषणा श्रीकृष्णस्य रुक्मिणीहरणं कृतायाश्च तस्यां यादवैः सह राज्ञां तुमुलयुद्धादिकं हरिवंशे। ११६ अध्याये द्रष्टव्यम् ॥॥ नारदस्य रुक्मिण्यै पारिजातपुष्पप्रदानवृत्तान्तं तत्रैव च १२२ अध्याये द्रष्टव्यम् ॥॥ अस्याः सन्ततिनामानि यथा तत्रैव। १६०। ४—६।
"————————रुक्मिणीतनयान् शृणु।
प्रद्युम्नः प्रथमं यज्ञे शम्बरान्तकरः सुतः॥
द्वितीयश्चारुदेष्णश्च वृष्णिसिंहो महारथः।
चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च॥
सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान्।
चारुबाहुः कनीयांश्च कन्या चारुमती तथा॥")
स्वर्णक्षीरी। इति राजनिर्घण्टः॥
रुक्मिणीव्रतं, क्ली, (रुक्मिण्या व्रतम्।) व्रतविशेषः। यथा,—
सूत उवाच।
"जामदग्न्यः समाकर्ण्य रमां तां पुत्त्रगर्द्धिनीम्
कल्केरभिमतं बुद्ध्वा कारयद्रुक्मिणीव्रतम्॥
व्रतेन तेन च रमा पुत्राढ्या सुभगा सती।
सर्व्वभोगेन संयुक्ता बभूव स्थिरयौवना॥
शौनक उवाच।
विधानं ब्रूहि मे सूत व्रतस्यास्य च यत् फलम्।
पुरा केन कृतं धर्म्म्यं रुक्मिणीव्रतमुत्तमम्॥
सूत उवाच।
शृणु ब्रह्मन्! राजपुत्त्री शर्म्मिष्ठा वार्षपर्व्वणी।
अवगाह्य सरोनीरं सोमं हरमपश्यत॥
सा सखीभिः परिवृता देवयान्या च संगता।
शम्भुभीत्या समुत्थाय पर्य्यधुर्व्वसनं द्रुतम्॥
तत्र शुक्रस्य कन्या या वस्त्रव्यत्यासमात्मनः।
संलक्ष्य कुपिता प्राह वसनं त्यज भिक्षुकि!॥